श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीपरमहंसस्वामिब्रह्मानन्द विरचितं

# ॥ श्री कमलापत्यष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कमलापत्यष्टकम् ॥

भुजगतल्पगतं घनसुन्दरं
गरुडवाहनमम्बुजलोचनम्।
नलिनचक्रगदाकरमव्ययं
भजत रे मनुजाः कमलापतिम्॥ 1 ॥

अलिकुलासितकोमलकुन्तलं
विमलपीतदुकूलमनोहरम्।
जलधिजाश्रितवामकलेवरं
भजत रे मनुजाः कमलापतिम्॥ 2 ॥

किमु जपैश्च तपोभिरुताध्वरैः
अपि किमुत्तमतीर्थनिषेवणैः।
किमुत शास्त्रकदम्बविलोकनैः
भजत रे मनुजाः कमलापतिम्॥ 3 ॥

मनुजदेहमिमं भुवि दुर्लभं
समधिगम्य सुरैरपि वाञ्छितम्।
विषयलम्पटतामपहाय वै
भजत रे मनुजाः कमलापतिम्॥ 4 ॥

न वनिता न सुतो न सहोदरो
न हि पिता जननी न च बान्धवाः।
व्रजति साकमनेन जनेन वै
भजत रे मनुजाः कमलापतिम्॥ 5 ॥

सकलमेव चलं सचराचरं
    जगदिदं सुतरां धनयौवनम्।
समवलोक्य विवेकदृशा द्रुतं
    भजत रे मनुजाः कमलापतिम्॥ 6॥

विविधरोगयुतं क्षणभङ्गुरं
    परवशं नवमार्गमलाकुलम्।
परिनिरीक्ष्य शरीरमिदं स्वकं
    भजत रे मनुजाः कमलापतिम्॥ 7॥

मुनिवरैरनिशं हृदि भावितं
    शिवविरिञ्चिमहेन्द्रनुतं सदा।
मरणजन्मजराभयमोचनं
    भजत रे मनुजाः कमलापतिम्॥ 8॥

हरिपदाष्टकमेतदनुत्तमं
    परमहंसजनेन समीरितम्।
पठति यस्तु समाहितचेतसा
    व्रजति विष्णुपदं स नरो ध्रुवम्॥ 9॥

॥ इति श्री कमलापत्यष्टकं समाप्तम्॥